# श्रीमद् भागवत रसिक कुटुंब

## प्रह्लाद कृत भगवद् स्तुति(विष्णु पुराण अंतर्गत)

नमस्ते पुण्डरीकाक्ष, नमस्ते पुरुषोत्तम ।
नमस्ते सर्वलोकात्मन्- नमस्ते तिग्मचक्रिणे ॥1॥

नमो ब्रह्मण्यदेवाय, गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय,  गोविन्दाय नमो नमः ॥2॥

ब्रह्मत्वे सृजते विश्वं, स्थितौ पालयते पुनः ।
रुद्ररूपाय कल्पान्ते, नमस्तुभ्यं त्रिमूर्तये ॥3॥

देवा यक्षासुराः सिद्धा, नागा गन्धर्वकिन्नराः ।
पिशाचा राक्षसाश्चैव, मनुष्याः पशवस्तथा ॥4॥

पक्षिणः स्थावराश्चैव, पिपीलिकसरीसृपाः ।
भूम्यापोऽग्निर्नभो वायुः, शब्दः स्पर्शस्तथा रसः ॥5॥

रूपं गन्धो मनो बुद्धि-रात्मा कालस्तथा गुणाः ।
एतेषां परमार्थश्च, सर्वमेतत्त्वमच्युत ॥6॥

विद्याविद्ये भवान्सत्य-मसत्यं त्वं विषामृते ।
प्रवृत्तं च निवृत्तं च, कर्म वेदोदितं भवान् ॥7॥

समस्तकर्मभोक्ता च, कर्मोपकरणानि च ।
त्वमेव विष्णो सर्वाणि, सर्वकर्मफलं च यत् ॥8॥

मय्यन्यत्र तथान्येषु, भूतेषु भुवनेषु च ।
तवैव व्याप्तिरैश्वर्य- गुणसंसूचिकी प्रभो ॥9॥

त्वां योगिनश्चिन्तयन्ति, त्वां यजन्ति च याजकाः।
हव्यकव्यभुगेकस्त्वं, पितृदेवस्वरूपधृक् ॥10॥

रूपं महत्ते स्थितमत्र विश्वं, ततश्च सूक्ष्मं जगदेतदीश ।
रूपाणि सर्वाणि च भूतभेदास्-तेष्वन्तरात्माख्यमतीव सूक्ष्मम् ॥11॥

तस्माच्च सूक्ष्मादिविशेषणाना-मगोचरे यत्परमात्मरूपम् ।
किमप्यचिन्त्यं तव रूपमस्ति, तस्मै नमस्ते पुरुषोत्तमाय ॥12॥

सर्वभूतेषु सर्वात्मन्-या शक्तिरपरा तव ।
गुणाश्रया नमस्तस्यै, शाश्वतायै सुरेश्वर ॥13॥

यातीतगोचरा वाचां, मनसां चाविशेषणा ।
ज्ञानिज्ञानपरिच्छेद्या, तां वन्दे स्वेश्वरीं पराम् ॥14॥

ॐ नमो वासुदेवाय, तस्मै भगवते सदा ।
व्यतिरिक्तं न यस्यास्ति, व्यतिरिक्तोऽखिलस्य यः ॥15॥

नमस्तस्मै नमस्तस्मै, नमस्तस्मै महात्मने ।
नाम रूपं न यस्यैको, योऽस्तित्वेनोपलभ्यते ॥16॥

यस्यावताररूपाणि-समर्चन्ति दिवौकसः।
अपश्यन्तः परं रूपं, नमस्तस्मै महात्मने ॥17॥

योऽन्तस्तिष्ठन्नशेषस्य, पश्यतीशः शुभाशुभम् ।
तं सर्वसाक्षिणं विश्वं, नमस्ये परमेश्वरम् ॥18॥

नमोऽस्तु विष्णवे तस्मै, यस्याभिन्नमिदं जगत् ।
ध्येयः स जगतामाद्यः, स प्रसीदतु मेऽव्ययः ॥19॥

यत्रोतमेतत्प्रोतं च, विश्वमक्षरमव्ययम् ।
आधारभूतः सर्वस्य, स प्रसीदतु मे हरिः ॥20॥

ॐ नमो विष्णवे तस्मै, नमस्तस्मै पुनः पुनः ।
यत्र सर्वं यतः सर्वं, यः सर्वं सर्वसंश्रयः ॥21॥

सर्वगत्वादनन्तस्य, स एवाहमवस्थितः ।
मत्तः सर्वमहं सर्वं, मयि सर्वं सनातने ॥22॥

अहमेवाक्षयो नित्यः, परमात्मात्मसंश्रयः ।
ब्रह्मसंज्ञोऽहमेवाग्रे, तथान्ते च परः पुमान् ॥23॥

ॐ नमः परमार्थार्थ, स्थूलसूक्ष्म क्षराक्षर ।
व्यक्ताव्यक्त कलातीत, सकलेश निरञ्जन ॥24॥

गुणाञ्जन गुणाधार, निर्गुणात्मन् गुणस्थित ।
मूर्त्तामूर्तमहामूर्ते, सूक्ष्ममूर्ते स्फुटास्फुट ॥25॥

करालसौम्यरूपात्मन्-विद्याऽविद्यामयाच्युत ।
सदसद्रूपसद्भाव, सदसद्भावभावन ॥26॥

नित्यानित्यप्रपञ्चात्मन्-निष्प्रपञ्चामलाश्रित ।
एकानेक नमस्तुभ्यं, वासुदेवादिकारण ॥27॥

यः स्थूलसूक्ष्मः प्रकटप्रकाशो, यः सर्वभूतो न च सर्वभूतः ।
विश्वं यतश्चैतदविश्वहेतोर्-नमोऽस्तु तस्मै पुरुषोत्तमाय ॥28॥

देव प्रपन्नार्त्तिहर, प्रसादं कुरु केशव ।
अवलोकनदानेन, भूयो मां पावयाच्युत॥29॥

नाथ योनिसहस्रेषु, येषु येषु व्रजाम्यहम्।
तेषु तेष्वचला भक्ति-रच्युतास्तु सदा त्वयि॥॥30॥

या प्रीतिरविवेकानां, विषयेष्वनपायिनी ।
त्वामनुस्मरतः सा मे, हृदयान्मापसर्पतु ॥31॥